# MODEL TEST PAPER , 2020-21

## SUBJECT – SANSKRIT (code-122)

## CLASS – 10

**समयः - होरासार्धत्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः-**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम् –**

| | | |
|---|---|---|
| 'अ' - भागः | (बहुविकल्पात्मकः) | 40 अङ्काः |
| 'आ' - भागः | (वर्णनात्मकः) | 40 अङ्काः |

(i) अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।

(ii) 'अ' - भागः बहुविकल्पात्मकः अस्ति।

(iii) 'आ' - भागः वर्णनात्मकः अस्ति।

(iv) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(v) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(vi) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

# "अ" - भागः 40 अङ्काः

## (बहुविकल्पात्मकाः प्रश्नाः)

**1. अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिच्छेदपदं वा चिनुत - (केवलं प्रश्नचतुष्टयम्)** (1×4=4)

(i) <u>क्रुद्धः + सिंहः</u> तं प्रहर्तुमिच्छति ।

(क) क्रुद्धोसिंहः (ख) क्रुद्धस्सिंहः (ग) क्रुद्धसिंहः

(ii) <u>एतस्मादेव</u> तु कथयामि यदहमेव योग्यः वनराजपदाय ।

(क) एतस्माद + एव (ख) एतस्मान् + एव (ग) एतस्मात् +एव

(iii) कथं <u>जनस्तं</u> परितोषयिष्यति ।

(क) जनः + तं (ख) जनस् + तं (ग) जनो + अस्तं

(iv) <u>उदीरित: + अर्थः</u> पशुनापि गृहयते ।

(क) उदीरितोर्थः (ख) उदीरितोऽर्थः (ग) उदीरितार्थः

(v) त्वया महत्कौतुकम् आवेदितं <u>यन्मानुषाद</u>पि बिभेषि?

(क) यन् + मानुषाद (ख) यम् + मानुषाद (ग) यत् + मानुषाद

**2. अधोलिखितवाक्येषु रेखाङ्कितपदस्य समासं विग्रहं वा विकल्पेभ्यः चिनुत - (केवलं प्रश्नचतुष्टयम्)** (1×4=4)

(i) काकः कृष्णः पिकः कृष्णः को भेदः <u>पिककाकयोः</u> ।

(क) पिक: च काकयोः च (ख) पिकः च काकः च (ग) पिकः च काकः च तयोः

(ii) अहमेव योग्यः <u>वनराजपदाय</u> ।

(क) वनराज्ञ: पदाय (ख) वनराजाय पदाय (ग) वनराजयोः पदाय

(iii) सर्वं वृत्तमवगत्य स तं निर्दोषम् अमन्यत् ।

(क) दोषाणाम् अभावः (ख) दोषेण सहितम् (ग) दोषम् अनतिक्रम्य

(iv) न्यायस्य अधीशः तं शवं न्यायालये आनेतुमादिष्टवान्।

(क) न्यायाधीशः (ख) न्यायधीशः (ग) न्यायीशः

(v) शृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती-

(क) सशृगाल: (ख) सशृगालम् (ग) प्रतिशृगालम्

**3. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य वियुज्य वा उत्तरं विकल्पेभ्यः चिनुत - (केवलं प्रश्नचतुष्टयम्)** (1×4=4)

(i) विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।

(क) चक्षुष् + मतुप् (ख) चक्षुस् + मतुप् (ग) चक्षु: + मतुप्

(ii) दीनस्य तु सतः शक्र! पुत्रस्याभ्यधिका कृपा ।

(क) अधिकः + टाप् (ख) अधिका + तल् (ग) अधिक + टाप्

अथवा

प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा।

(क) शुभावह + मतुप (ख) शुभावह + टाप् (ग) शुभावह + तल्

(iii) ते जनाः गुणवन्तः आसन् ।

(क) गुण + मतुप (ख) गुण + मतुप् (ग) गुण + क्तवतु

(iv) सम्प्रति अपिवेदानां महत्त्वं विद्यते ।

(क) महत् + त्व (ख) महत् + त्वम् (ग) महत्व्ट + त्व

(v) व्याघ्रं दूरात् दृष्ट्वा <u>बुद्धिमती</u> चिन्तितवती-

(क) बुद्धि + मतुप्   (ख) बुद्धि + क्तवतु   (ग) बुद्धि + णिनि

**4. वाच्यस्य नियमानुगुणं उचितं विकल्पं चिनुत - (केवलं प्रश्नत्रयम्)**

(1×3=3)

(i) मोहन: - रमे ! किं ........... कुत्रापि गम्यते।

(क) त्वम्   (ख) त्वया   (ग) मया

(ii) रमा - आम् ! अहं प्रदर्शनीम् एव द्रष्टुं (ii).................।

(क) गच्छामः   (ख) गच्छामि   (ग) गम्यते

(iii) मोहनः - अधुना यावत् (iii).............. किमर्थम् न अगच्छः?

(क)त्वया   (ख) त्वम्   (ग) तुभ्यम्

(iv) रमा - अहं पाकशालायां व्यस्ता (iv)........... ।

(क) आसीत्   (ख) आसन्   (ग) आसम्

**5. प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकं शब्दं चिनुत - (केवलं प्रश्नचतुष्टयम्)** (1X4=4)

(i). सायं (6:15) ………………….. आरती भवति।

(क) सपादत्षड्वादने   (ख) सपादषड्वादने   (ग) पादोनसप्तवादने

(ii).अनन्तरं (6:45) ………………….मन्त्रकक्षाः आरभन्ते।

(क) पादोनसप्तवादने   (ख) सपादषड्वादने   (ग) पादोनषड्वादने

(iii).रात्रौ (8:30) ………………. वादने वयं भोजनं कुर्मः।

(क) सर्धाष्ट   (ख) सार्धाष्ट   (ग) सपादाष्ट

(iv) तदनन्तरम् (10:00) ..................... वादनपर्यन्तं अहम् अध्यनं करोमि |

(क) दशः (ख) दश (ग) सपाददश

(v) (11:00) ..................... वादने दीपनिर्वाणं कुर्मः |

(क) एकादश (ख)सपादैकादश (ग) पादोन-एकादश

**6. वाक्यानुगुणम् उचिताव्ययपदं चिनुत- (केवलं प्रश्नत्रयम्)**

(1×3=3)

(i) …………… एकं विशालम् उपवनम् अस्ति |

(क) कुत्र (ख) अत्र (ग) वृथा

(ii) वयं ..................कार्यं न कुर्याम।

(क) उच्चैः (ख) इदानीम् (ग) सहसा

(iii) .................वयं क्रीडनाय गतवन्तः |

(क) ह्यः (ख) श्वः (ग) यथा

(iv) निर्जनस्थाने वर्षा .................. भवति।

(क) श्व: (ख) वृथा (ग) एव

7. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धमस्ति |शुद्धं पदं विकल्पेभ्यः चिनुत- **(केवलं प्रश्नत्रयम्)** (1×3=3)

(i) <u>भवती</u> कुत्र गच्छन्ति ?

(क) भवन्तः (ख) भवान् (ग) भवत्यः

(ii) बालिकाः श्वः छात्रावासं <u>अगच्छन्</u>|

(क) आगमिष्यन्ति (ख) गमिष्यन्ति (ग) गच्छिष्यन्ति

(iii) <u>नगरस्य</u> बहिः कूपः आसन् |

(क) नगरम् (ख) नगरेण (ग) नगरात्

(iv) <u>सहस्त्राः</u> जनाः भ्रमणाय गच्छन्ति ।

(क) सहस्राः (ख) सहस्रम् (ग) सहस्राणि

## पठितावबोधनम्

**8.रेखाङ्कितपदानाम् आधृत्य प्रश्नवाचकं पदं चिनुत-**

**(केवलं प्रश्नपञ्चकम्)** (1×5=5)

(i) सः श्वः <u>प्रवारकम्</u> अपसार्य निवेदितवान् |

(क) कम् (ख) क: (ग) केन

(ii) <u>बुद्धिमती</u> उक्तवती ।

(क) कीदृशी (ख) का (ग) किम्

(iii) सः <u>भारवेदनया</u> क्रन्दति स्म|

(क) केन (ख) कस्याः (ग) कया

(iv) वयं <u>प्रकृत्याः मातुः</u> संततयः ।

(क) कस्याः (ख) कीदृशाः (ग) कस्य

(v) बन्धो! खगकुलकलरव <u>गुञ्जितवनदेशं</u> चल।

(क) कुत्र (ख) के (ग) कम्

(vi) जनकेन <u>सुताय</u> शैशवे विद्या धनं दीयते ।

(क) काय (ख) कस्मै (ग) किमर्थम्

**9. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चिनुत- (केवलं प्रश्नचतुष्टयम्)** (1×4=4)

(i) गुणी गुणं <u>वेत्ति</u> न वेत्ति निर्गुणो |

(क) जानाति (ख) पठति (ग) इच्छति

(ii) <u>निमित्तम्</u>उद्दिश्य हि यः प्रकुप्यति ।

(क) कारणम् (ख) उद्देश्यम् (ग) धनम्

(iii) तर्हि मां निजगले बद्ध्वा चल <u>सत्वरम्</u> ।

(क) इदानीम् (ख) शीघ्रम् (ग) तीव्रगतया

(iv) व्याघ्रजाद् भयात् पुनरपि <u>मुक्ता</u>ऽभवत् ।

(क) रहिता (ख) युक्ता (ग) पीडिता

(v) एवमेव वानराः वारं वारं सिंहं <u>तुदन्ति</u>।

(क) पीडयन्ति (ख) वाञ्छन्ति (ग) पश्यन्ति

**10.भाषिककार्यसंबद्धानां प्रश्नांना समुचितम् उत्तरं विकल्पेभ्य: चिनुत- (केवलं प्रश्नषट्कम्)** (1×6=6)

(i) "तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता" अस्मिन् वाक्ये क्रियापदं किम्?

(क) भार्या (ख) बुद्धिमती (ग) चलिता

(ii) "सुरभेरिमामवस्थां <u>दृष्ट्वा</u> सुराधिपः तामपृच्छत्" अत्र 'दृष्ट्वा' इत्यर्थे किं पर्यायपदं प्रयुक्तम् ?

(क) वीक्ष्य (ख) पश्यति (ग) दृश्य

(iii) "पश्यतः एव सर्वत्र जलोप्लवः सञ्जातः" अत्र क्रियापदं किम् ?

(क) पश्यतः (ख) जलोप्लवः (ग) सञ्जातः

(iv) "मूर्खाश्च मूर्खैः सुधियः सुधीभिः" अस्मिन् वाक्ये 'मूर्खैः' इत्यस्य किं विलोमपदं प्रयुक्तम् ?

(क) सुधीभिः (ख) सुधियः (ग) मूर्खा:

(v) "काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते"अस्मिन् वाक्ये विशेष्यपदं किम्?

(क) मन्यते (ख) विद्यार्थी (ग) काकचेष्टः

(vi) "वाष्पयानमाला सन्धावति वितरन्ती ध्वानम्" अत्र कर्तृपदं किम् ?

(क) वाष्पयानमाला (ख) सन्धावति (ग) ध्वानम्

(vii) "कश्चिद् तत्रत्यः कर्मचारी समागत्य न्यवेदयत्" अत्र विशेषणपदं किम् ?

(क) तत्रत्यः (ख) कर्मचारी (ग) समागत्य

(viii) "पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता" अत्र क्रियापदं किम् ?

(क) तपः (ख) तेपे (ग) उक्तिः

## "आ" - भागः

## वर्णनात्मकाः प्रश्नाः 40 अङ्काः

# अपठितावबोधनम्

**11. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि संस्कृतेन लिखत-**

अन्यस्य जनस्य हिताय यत् कार्यं चिन्तनं वा क्रियते तदेव परोपकारः भवति। मनुष्यस्य मध्ये प्र वृत्तिद्वयं दृश्यते-एका स्वार्थस्य अपरा च परोपकारस्य। केचन जनाः तादृशाः अपि सन्ति, ये न स्वार्थं समीहन्ते न च परोपकारं कुर्वन्ति। ते जनाः अतीव अधन्याः समाजाय च अभिशापरूपाः एव। यस्य केवला स्वार्थबु द्धिः, सः राक्षसः इव सततम् आचरति। ततः वरतराः ते जनाः , ये यद्यपि सर्वात्मना आत्मं भरयः, परं ते परमुखापेक्षिणः न तिष्ठन्ति। यः खलु स्वार्थं सेवमानः परमार्थम् अपि चिन्तयति करोति च यशाशक्ति, सः एव पुरुषः प्रशस्यः।

**अ. ए कपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** (1×2=2)

(i) अन्यस्य जनस्य हिताय चिन्तनं किम् भवति?

(ii) मनुष्यस्य मध्ये कति प्रवृत्तिः ?

(iii) ये केवलं स्वार्थं समीहन्ते परोपकारं च न कुर्वन्ति, ते जनाः के भवन्ति?

**आ. पूर्णवाक्येन उत्तरत -(केवलं प्रश्नद्वयम्)** (2×2=4)

(i) यस्य केवला स्वार्थबुद्धिः भवति, सः कः इव आचरति?

(ii) कीदृशाः जनाः अधन्याः अभिशापरूपाः च सन्ति?

(iii) कः पुरुषः प्रशस्यः भवति ?

**इ. अस्य गद्यांशस्य उपयुक्तं शीर्ष कं लिखत।** (1×1=1)

**ई. निर्देशानुसारं प्रदत्तवि कल्पेभ्य: उचितम् उत्तरं चित्वा लिखत।**

**(केवलं प्रश्नत्रयम्)** (1×3=3)

(i)'पुरुषः प्रशस्यः' इत्यनयोः पदयोः कः विशेष्यः?

(अ) पुरुषः (ब) यशाशक्ति (स) प्रशस्यः

(ii)'परमार्थबुद्धिः' इत्यस्य पदस्य कः विपर्ययः गद्यांशे आगतः?

(अ)स्वार्थबु द्धिः (ब) परार्थबुद्धिः (स) बु द्धिः

(iii)'निरन्तरम्' इति पदस्य कृते गद्यांशे किं पदं प्रयुक्तम् ?

(अ)विराजते (ब) सततम् (स) तादृशम्

(iv)'आचरति' इति क्रियापदस्य अनुच्छेदे कि कतृर्पदम् आगतम्?

(अ) राक्षस (ब) स्वार्थबुद्धिः (स) सः

**12. भवान् गिरीशः। भवतां विद्यालये संस्कृतसप्ताहः समायोजितः। तत्र संस्कृतसम्भाषणप्रतियोगितायाम् भवता प्रथमः पुरस्कारः प्राप्तः। तत् सूचयता भवता स्वमित्रं पुनीतं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पुनः पत्रं लिख्यताम्। सहायतायै मञ्जूषा अपि दत्ता-**

छात्रावासः

12, मालवीयनगरम्

(i) ……………………

दिनाङ्कः …………………………

प्रियमित्र (ii) ……………………………

सस्नेहम् (iii)………………………………।

अत्र वयं सर्वे कुशलिनः। अस्मा कं विद्यालये गतसप्ताहे संस्कृतसप्ताहः ( iv) …………………………। तत्र एका सम्भाषणप्रतियोगिता ( v) …………… । अहं तस्यां (vi) …………………… प्रथमपुरस्कारं प्राप्तवान्। संस्कृतसम्भाषणेन ( vii) ……………………. आत्मविश्वासः जागृतः अभवत्। इदानीम् अहं संस्कृते एव (viii) ………………………। भवान् अपि तथा प्रयत्नं कुर्यात्।

पितृभ्याम् नमोनमः।

(ix) …………………… अभिन्नमित्रम्

(x) ………………………

| | |
|---|---|
| **मञ्जूषा-** | अभिवादनम्, वदामि, पुनीत, दिल्लीतः, अभवत्, मयि, भवतः, समायोजितः, गिरीशः, प्रतियोगितायाम्, |

**13. अधोलिखितं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि लिख्यन्ताम्** — (1×5=5)

**मञ्जूषा**

| |
|---|
| पलायितौ, धृत्वा, कुर्वन्ति, देशरक्षकेभ्यः, सैनिकाः, नमः, अन्ताराष्ट्रियसीमायाः, अवैधप्रवेशम्, प्रहरिणः, भुशुण्डिं, परितः, पर्वताः, दृष्ट्वा, आतङ्कवादिनौ, देशरक्षकान्, सन्नद्धाः |



**अथवा**

**मञ्जूषाप्रदत्तशब्दानां सहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -** (1×5=5)

"कोरोना वायरसः"

| | |
|---|---|
| मञ्जूषा- | रोगस्य, चीनदेशस्य, विश्वस्वास्थ्यसंगठनं, महामारी ,निर्देशानां, पालनीयम्, बुहाननगरे, मुखपट्टिका, हस्तप्रक्षालनम्, सावधानतया, चिकित्साविभागस्य \| |

**14. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत -**

**(केवलं प्रश्नपञ्चकम्)** (1×5=5)

- (i) **कल तुम कहाँ थे ?** **Where were you yesterday ?**
- (ii) **बच्चा कुत्ते से डरता है |** **The child is scared of dog.**
- (iii) **क्या मैं अंदर आऊँ ?** **May I come in ?**
- (iv) **कल विद्यालय का अवकाश रहेगा | Tomorrow the school will remain closed.**
- (v) **माता खाना पकाती है |** **Mother cooks food.**
- (vi) **कृपया तुम मेरे लिए भोजन लाओ | Please bring food for me.**
- (vii) **साहस मनुष्य का सबसे बड़ा आभूषण है| Courage is the greatest ornament of a man.**

**15. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखित -**

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्व न्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः

अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः। भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्रभ्यामश्रूणि आविरासन्। सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत् - अयि शुभे! किमेवं रोदिषि? उच्यताम् इति।

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** (1/2×2=1)

(क) क्षेत्रकर्षणं कः करोति स्म ?

(ख) कः दुर्बलः आसीत्?

(ग) कृषकः काभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् ?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** (1×2=2)

(क) कुद्धः कृषीवलः किम् अकरोत् ?

(ख) सुराधिपः सुरभिम् किम् अपृच्छत् ?

(ग) सः बृषभः कथं क्षेत्रे पपात ?

**16. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखित-**

**क्रोधो हि शत्रुः प्रथमो नराणां,**

**देहस्थितो देहविनाशनाय ।**

**यथास्थितः काष्ठगतो हि वह्निः,**

**स एव वह्निर्दहते शरीरम्।।5।।**

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** (½×**2=1)**

(क) केषां प्रथमः शत्रुः क्रोधः?

(ख) शरीरं कः दहति?

(ग) नराणां प्रथमः शत्रुः कः ?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** (1×**2=2)**

(क) काष्ठगतः वह्निः किं करोति?

(ख) क्रोधः किं दहते?

(ग) कीदृशो अग्निः शरीराणि दहति?

**17. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखित-**

**सिंहः -** (क्रोधेन गर्जन्) भोः! अहं वनराजः। किं भयं न जायते ? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा ?

**एकः वानरः** - यतः त्वं वनराजः भवितुं तु सर्वथा ऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि ?

**अन्यः वानरः**- किम् न श्रुता त्वया पञ्चतन्त्रोक्तिः -

यो न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा।

जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः ।।

**काकः** -आम् सत्यं कथितं त्वया। वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।

**पिकः** - (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र 'का-का' इति

कर्कशध्वनिना वातावरणमाकुलीकरोषि। न रूपं न ध्वनिरस्ति ।

कृष्णवर्णः, मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम्?

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (½×**2=1)**

(क) कः वनराजः भवितुं सर्वथाऽयोग्यः?

(ख) वस्तुतः वनराजः भवितुं तु कः योग्यः?

(ग) कीदृशान् जनान् राजा न रक्षति ?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** (1×**2=2)**

(क) यः वित्रस्तान् न रक्षति सः किं कथ्यते?

(ख) पिकः काकं वनराजरूपेण कथं न स्वीकरोति?

(ग) कः कथयति 'अहं वनराजः अस्मि?

**18.मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत-** (½×4=2)

**वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।**

**कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्।।**

**करणीयं बहिरन्तर्जगति तु बहुशुद्धीकरणम्। शुचि पर्यावरणम्।।**

**अन्वयः-** हि वायुमण्डलं भृशं (i)................. (जातम्) जलं निर्मलं न (अस्ति) , भक्ष्यं कुत्सिवस्तुमिश्रितं , (ii)..................समलं, जगति तु (iii).................बहिः (iv)...................करणीयम् (अस्ति), शुचि पर्यावरणम् (भवेत्)।

| | |
|---|---|
| **मञ्जूषा-** | दूषितम् ,बहुशुद्धीकरणम्, धरातलम्, अन्तः |

**अथवा**

**अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितं पदं चित्वा पूरयत -**

(½×4=2)

**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**

**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ।।**

**भावार्थः-** अस्य भावोऽस्ति यत् (i) -------------- शरीरे स्थितम् (ii) ------------- एव तेषां महान् शत्रुः अस्ति। एवमेव पुरुषार्थम् इव तेषां कोऽपि अन्यः (iii)---------- नास्ति। तं पुरुषार्थं कृत्वा (iv) -------------- कदापि न दुखीयन्ति।

| | |
|---|---|
| **मञ्जूषा-** | मानवाः, मानवानाम्, बन्धुः , आलस्यम् |

**19. अधोलिखित - कथांशं समुचितक्रमेण लिखत-** (½×8=4)

(i) तेन वित्तेन तत्पुत्रम् महाविद्यालये प्रवेशं दापयितुं सफलः जातः।

(ii) तत्र निवसन् अधययने संलग्नः समभूत्।

(iii) पिता पुत्रं द्रष्टुं प्रस्थितः।

(iv) कश्चन निर्धानः जनः वित्तमुपार्जितवान्।

(v) सः बसयानं विहाय पदातिरेव प्राचलत्।

(vi) एकदा तस्य पुत्रः रुग्णः अभवत्।

(vii) तत्तनयः छात्रवासे वसति स्म।

(viii) पुत्रस्य रुग्णतामाकर्ण्य सः व्याकुलः सञ्जातः।

*****

Prepared by-

Dr. G. L. Bhardwaj, OPJS, Raigarh (C.G.)